# क्षेत्राध्ययनम्

— विषयः —

## असम बौद्ध विहारस्य क्षेत्राध्ययनम्

डिम्पी बर्मण
संस्कृत साहित्य
क्रमांक — 06
कु. भा. व. स. पु. वि. नमाटि
२०२०

# भूमिका

भगवतो बुद्धस्य जन्म ५६७ ख्रीष्टपूर्वे अभवत्। तस्य अयं महापुरुषः मानवान् अहिंसायाः पाठम् अपाठयत्। अयमेव महापुरुषः जनानां दुःखनिवारणाय स्वकीयं राज्यमत्यजत्। सोऽयं महापुरुषः कपिलवस्तुनरेशस्य शाक्यवंशीयस्य शुद्धोदनस्य सुपुत्रः आसीत्। अस्य प्रथमं नामधेयं सिद्धार्थ इति आसीत्। बाल्यादेव सिद्धार्थस्य चित्तं विषयेषु नारमत। पुत्रस्य एतादृशीं विरक्तिं विलोक्य पिता तत् कृते सकलानि सुखसाधनानि समयोजयत्। परं सिद्धार्थस्य चित्तं तेषु मनागपि आसक्तं नाभवत्। अथ कदाचित् आतुरं कदाचित् वृद्धम्, अनन्तरं मृतकं ततः संन्यासिनं च विलोक्य तस्य हृदये महद्वैराग्यम् अजायत। अतः मानवानां दुःखनिवृत्तये राजकुमारः सिद्धार्थः रात्रौ पत्नीं नवजातं पुत्रं च विहाय गृहात् प्राव्रजत्। अनन्तरं स: महता श्रमेण सततनाभ्यासेन तपस्यया च एकस्मिन् दिने बोधम् अलभत्। ततः स जनेभ्यः उपादिशत् "जगदिदं दुःखमयम्, दुःखस्य मूलं कामना, कामनायाः उन्मूलनम् साध्यम्, एवं दुःखनिवृत्ति सम्भाव्या" इति। महात्मा बुद्धः एतेषां चतुर्णाम् आर्यसत्यानां प्रचारम् अकरोत्। सः जनानां दुःखनिवारणाय तेषां कल्याणाय च उपादिशत्। तस्य मृत्युः ४८३ ख्रीष्टपूर्वे उत्तरप्रदेशस्य कुशीनगरे अभवत्।